# ।। मंगलकवचम् ।।

अस्य श्रीअंगारककवचस्तोत्रमंत्रस्य
कश्यप ऋषिः
अनुष्टुप् छन्दः
अंगारको देवता
भौमप्रीत्यर्थं जपे विनियोगः ।

रक्तांकरो रक्तवपुः किरीटी चतुर्भुजो मेषगमो गदाभृत् ।
धरासुतः शक्तिधरश्च शूली सदा मम स्याद्वरदः प्रशांतः ।।१।।
अंगारकः शिरो रक्षेन्मुखं वै धरणीसुतः ।
श्रवौ रक्तांबरः पातु नेत्रे मे रक्तलोचनः ।।२।।
नासां शक्तिधरः पातु मुखं मे रक्तलोचनः ।
भुजौ मे रक्तमाली च हस्तौ शक्तिधरस्तथा ।।३।।
वक्षः पातु वरांगश्च हृदयं पातु रोहितः ।
कटिं मे ग्रहराजश्च मुखं चैव धरासुतः ।।४।।
जानुजंघे कुजः पातु पादौ भक्तप्रियः सदा ।
सर्वाण्यन्यानि चांगानि रक्षेन्म मेषवाहनः ।।५।।
य इदं कवचं दिव्यं सर्वशत्रुनिवारणम् ।
भूतप्रेतपिशाचानां नाशनं सर्वसिद्धिदम् ।।६।।
सर्वरोगहरं चैव सर्वसंपत्प्रदं शुभम् ।
भुक्तिमुक्तिप्रदं नृणां सर्वसौभाग्यवर्धनम् ।
रोगबंधविमोक्षं च सत्यमेतन्न संशयः ।।७।।

इति श्रीमार्कंडेयपुराणे मङ्गलकवचं संपूर्णम् ।।